ISSN : 2582-9092

# गौतमधर्मसूत्रे दायभागः–एका समीक्षा

डॉ बर्णाली बरठाकुरः

**सारांशः** – कल्पवेदांगान्तर्गते धर्मसूत्रसाहित्ये, स्मृतिसाहित्ये, पुराणसाहित्ये तथा महाभारतादि ग्रन्थेषु दायभागस्य विस्तृता आलोचना कृता अस्ति । धर्मसूत्रेषु वर्णितविषयेषु दायभागः महत्वपूर्णविषयः। आचार्यगौतमप्रणीतस्य गौतमधर्मसूत्रस्य तृतीयप्रश्नस्य दशमेऽध्याये प्राचीनभारतवर्षस्य दायविभागसम्बन्धिबहुविधं तथ्यमुपलभ्यते । दायभागपदेन पुत्राणां पितुः सम्पत्तौ भागः बुध्यते । पितरि मृते वा तिष्ठते वा पुत्रास्तदीयं रिक्थम् अर्थात् धनादिनं प्राप्नुवन्ति। गौतमधर्मसूत्रानुसारं सम्पत्तिविभाजनप्रक्रिया कीदृशी भवेत् तदेव आलोचितं भविष्यति पत्रेऽस्मिन् ।

**मुख्यशब्दानि**– गौतमधर्मसूत्रम्, दायभागः, स्त्रीधनम् ।

१. **शोधोद्देश्यम्** – आचार्यगौतमप्रणीतस्य गौतमधर्मसूत्रे दायविभागसम्बन्धिबहुविधानि तथ्यानि प्राप्यन्ते। दायभागपदेन पुत्राणां पितुः सम्पत्तौ भागः बुध्यते। पितरि मृते वा तिष्ठते वा पुत्रास्तदीयं रिक्थम् प्राप्नुवन्ति। गौतमधर्मसूत्रे दायभागस्य विभिन्नविषयाणां विवेचनमेव शोधपत्रस्यास्य मुख्योद्देश्यमस्ति ।

२. **विश्लेषणम्** – गौतमधर्मसूत्रानुसारं पितुः मृत्योः परं दायविभाजनं भवेत्। अथवा पितुः जीवनकाले तस्य इच्छानुसारं अथवा मातुः रजोदर्शननिवृत्तेः परं विभाजनं भवेत् । उक्तञ्च गौतमेन–

**''ऊर्ध्वं पितुः पुत्राः रिक्थं भजेरन् ।**
**निवृत्ते रजसि मातुर्जीवति चेच्छति''।।१ इति**

मनुस्मृतिग्रन्थेऽपि मनुना एवमुक्तम्–

**''ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह।**
**भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः''।।२ इति**

अर्थात् पितुः जीवितकाले एव पुत्रेषु तदीयं रिक्थम् अर्थात् स्वगृहक्षेत्रदासगवाश्वस्वर्णादिकं विभज्यते। ज्येष्ठपुत्र एव तस्य रिक्थस्य अधिकारी भवेत् इति साधारणनियमः। स पितृवद् इतरान् भात्रादिकां पोषयेत् पितृप्रदत्तेन धनेन। अनेन धर्मवृद्धिभवति इति अभिप्रायः । गौतमेन उक्तमेवम्–

**''सर्वं वा पूर्वजः स्वेतरान्बिभृयात्पितृवत्। विभागे तु धर्मवृद्धिः।।३ इति**

२.१ दायविभागे सर्वस्मात् पितृधनाद् विंशतितमो भागः, मिथुनपशुविशेषं उभयतोदन्तशीलः तथाविधः रथः, गोवृषः ज्येष्ठपुत्रस्य भवति। मध्यमपुत्रेण काणः (एकनेत्रः), खोरः(वृद्धः), कूटः(श्रृंगहीनः), वणेटः(विकलवालधिः) – एवंविधाः पशवः दानरूपेण प्राप्यन्ते। यः कनिष्ठतमः पुत्रः तस्य केवलं अविः,

ISSN : 2582-9092

धान्यम्, आयसम् – एतत् सर्वं दायरूपेदायरूपेण प्राप्तिर्भवन्ति। शिष्टपितृलब्धः वस्तु सर्वेषु समप्रमाणः भवेत्। एतत् सर्वं सूत्ररूपेण गौतमेन उक्तम् –––

**"विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो रथो गोवृषः।।**
**काणखोरकूटवणेटा मध्यमस्यानेकाश्चेत्।।**
**अविर्धान्यायसी गृहमनोयुक्तं चतुष्पदां चैकैकं यवीयसः।।"४ इति**

यः पुत्रहीनः आसीत् कन्यादानकाले तेन पित्रा स्वीयकन्या पुत्रिकारूपेण व्यवदिभयते स्म। अतः पुत्रिकादोषपरिहारार्थं गौतमेन अभ्रातृककन्यायाः विवाहः निवारितः। तेनोक्तम् – 'तत्संशयान्नोपयच्छेतृभ्रातृकाम्'५ इति। अर्थात् भातृहीनां कन्यां न विवाहयेत् विवाहं न कुर्यात्। अनपत्यस्य मरणादूर्ध्वं तदीया स्त्री अथवा सपिण्डः सगोत्रः सर्षिकः वा व्यक्तिविशेषः तत् धनस्य अधिकारी भवेत्।

२.२ स्त्रीधनप्रसङ्गे गौतमेन एवमुक्तम् – 'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानां च' इति६। स्त्रीधनं तु स्त्रीभिः पितृगृहात् आनीतं भवति। आचार्यगौतमानुसारं एतदृशं स्त्रीधनं तस्यां मृतायां दुहितृणामप्रत्तानां (अविवाहितानाम्) भवति। प्रत्तासु प्रतिष्ठिताः काश्चित्काश्चिद्प्रतिष्ठिताः। प्रत्ताप्रत्तासमवाये तु तद्धनं अप्रत्ता गृह्नाति। अपि च प्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठिता तद्धनं गृह्णाति।

२.३ प्रेतानां असंसृष्टिनां विभागः केन प्राप्यते इत्यस्मिन् विषये गौतमेन उक्तम् – 'असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य'७ इति। अर्थात् विभक्तानामनपत्यानां भ्रातृणां प्रात्तानां यो विभागो विभक्तव्यो धनादिः स ज्येष्ठस्य भ्रातुभवति नेतरेषां भ्रातृणां नापि पत्न्या न च पितुर्भवति। विभागादूर्ध्व उत्पन्नस्य जातम् पुत्रस्य पितृधनस्य उपरि अधिकारो भवति एव। विद्यामधीः इति वैद्यः। वैद्यः स्वयमर्जितं धनं विद्यारहितेभ्यः भ्रातृभ्यः दद्यात्। यदा तु सर्वे भ्रातरो मूर्खाः तदा समं विभजरेन्। तदोक्तं गौतमेन –

**''स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्।**
**अवैद्याः समं विभजरेन्।'' इति८**

२.४ औरसः, क्षेत्रजः, दत्तः, कृतिमः, गुढोत्पन्नः तथा अपविद्धः – षडेते पुत्राः रिक्थभाजाः भवन्ति –''पुत्रा औरसक्षेत्रजदत्तकृतिमगूढोत्पन्नापविद्धा रिक्थभाजः'' इति६। अस्मिन् प्रसङ्गे मनुनामपि उक्तम् –

**''औरसः क्षेत्रजश्चैव दत्तः कृतिम एवः एवच।**
**गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्।''१०**

स्वभार्यायां कन्याऽवस्थायामेव कृतविवाहसंस्कारायां यं स्वमुत्पादयेत्तं पुत्रम् औरसं विद्यात् ।११ यो मृतस्य नपुंसकस्य प्रसवविरोधिव्याध्युपेतस्य वा भार्यायां घृताक्तत्वादिनियोगधर्मेण गुरुनियुक्तायां जातः स क्षेत्रजः पुत्रो मन्वादिभिः स्मृतः।१२ माता पिता वा परस्परानुजज्ञया यं पुत्रं परिग्रहीतुः समानजातीयं तस्यैव

पुत्राभावनिमित्तायामापदि प्रीतियुक्तं न तु भयादिना उदकपूर्वं दद्यात्स दत्त्रिमाख्यः पुत्रो विज्ञेयः।१३ यं पुनः समानजातीयपित्रोः पारलौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत इत्येवमादिइं, पुत्रगुणैश्च मातापित्रोराराधनादियुक्तं पुत्रं कुर्यात्सो कृत्रिमाख्यः पुत्रो वाच्यः।१४ यस्य गृहेऽवस्थितायां भार्यायां पुत्र उत्पद्यते, सजातोयोऽयं भवतीति ज्ञानेऽपि कस्मात्पुरूषविशेषाजातोऽसाविति न ज्ञायते, स गृहेऽप्रकाशमुत्पन्नस्तस्य पुत्रः गूढ इति उच्यते।१५ मातापितृभ्यां त्यक्तं, तयोरन्यतरमरणेनान्यतरेण वा त्यक्तं पुत्रं यः स्वीकुर्यात्सोपविद्धाख्य पुत्र उच्यते।१६ एते षड्पुत्राः पितुः रिक्थम् अर्थात् धनादिनां प्राप्नुवन्ति ।१७ तेषामभावे कानीनः, सहोढः पौनर्भवः, पुत्रिकापुत्रः, स्वयंदत्तः तथाक्रीतापुत्राःपित्रृधनानांचतुर्थांशभजन्तेकानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंदत्त क्रीता गोत्रभाजः पितृगृहे कन्या य पुत्रमप्रकाश जनयेत्तं कन्यापरिणेतुः पुत्रं नाम्ना कानीनं वदेत् ।१८

**२.५** या गर्भवती अज्ञातगर्भ ज्ञातगर्भा वा परिनीयते, स गर्भस्तस्यां जातः परिणेतुः पुत्रो भवति, सहोढ इति व्यपदिशयते।१९ या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छयान्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत्स उत्पादनस्य पौनर्भवः पुत्र उच्यते।२० यो मृतमातापितृकस्त्यागेचितकारणं विना द्वेषादिना ताभ्यां त्यक्तो वाआत्मानं यस्मै ददाति स स्वयंदत्ताख्यस्तस्य पुत्रो मन्वादिभिः स्मृतः।२१ यः पुत्रार्थे मातापित्रोः सकाशाद्यं क्रीणीयात्स क्रीतकस्तस्य पुत्रो भवति।२२ एवं एते पुत्राः पितुः धनादीनि प्राप्नुवन्ति।

**२.६** अपि च ब्राह्मणस्य राजन्यायां जातः पुत्रो यदि गुणसम्पन्नो ज्येष्ठश्च भवति तर्हि सोऽपि पितृधनं प्राप्नोति–"ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठो गुणसंपन्न स्तुल्यभाक्" इति ।२३ परन्तु ज्येष्ठपुत्रस्यातिरिक्तं धनं तैः न प्राप्यते। अनपत्यस्य ब्राह्मणस्य क्षोत्रिया रिक्थं भजेरन्२४ । इतरेषामनपत्यानां क्षत्रियादीनां रिक्थं राजा भजेत् । प्रातिलोम्येन जाताः पुत्रा अपि धनाधिकारिणः भवन्ति इति गौतमवचनादवगम्यते।२५

## ३. निष्कर्ष –

एवं सम्पत्तिविभाजनप्रक्रियाआचार्येण गौतमेन सविस्तरेण वर्णिताऽस्ति ।वर्तमानसमये अपि दायविभागो सम्पत्तिविभाजनं वा अतीवगुरुत्वपूर्णविषयः। शास्त्रोक्तविधिना दायविभागं कुर्यात्, अन्यथा अपराधः सञ्जायते। अतएव दायभागस्य गुरुत्वं सर्वदा वर्तते एव।

## सन्दर्भसूत्राणि –

१. गौतमधर्मसूत्रम् – ३.१०.१
२. मनुस्मृतिः – ९.१०४
३. गौतमधर्मसूत्रम् – ३.१०.२–४
४. तत्रैव – ३.१०.४–७

५. तत्रैव – ३.१०.१८
६. तत्रैव – ३.१०.२२
७. तत्रैव – ३.१०.२५
८. तत्रैव – ३.१०.२८ – २६
६. तत्रैव – ३.१०.३०
१०. मनुस्मृतिः – ६.१५६
११. तत्रैव – ६.१६६
१२. तत्रैव – ६.१६७
१३. तत्रैव – ६.१६८
१४. तत्रैव – ६.१६६
१५. तत्रैव – ६.१७०
१६. तत्रैव – ६.१७१
१७. गौतमधर्मसूत्रम् – ३.१०.३१
१८. मनुस्मृतिः – ६.१७२
१६. तत्रैव – ६.१७३
२०. तत्रैव – ६.२७५
२१. तत्रैव – ६.१७७
२२. तत्रैव – ६.१७४
२३. गौतमधर्मसूत्रम् – ३.१०.३३
२४. तत्रैव – ३.१०.३६
२५. तत्रैव – ३.१०.४०

**सन्दर्भग्रन्थाः –**


१. वैकिकवाङ्मयस्येतिहासः, सम्पादकः– आचार्य जगदीशचन्द्रमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०२१
२. गौतमधर्मसूत्राणि, सम्पादकः : डा. उमेशचन्द्र पाण्डेय, चौखम्बा संस्कृत संस्थान, वाराणसी, २०१३
३. मनुस्मृतिः, सम्पादकः : सत्यभूषणो योगी, मोतीलाल बनारसीदास, दिल्ली, २००८



**सहायकाचार्यः,**
संस्कृतवेदाध्ययनविभागः,
कुमारभास्करवर्मसंस्कृत–पुरातनताध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः